# गद्यसाहित्य

## लघूत्तरीयाः प्रश्नाः

१. गद्यम् किम् ?

১. গদ্যম্ কিম্ ?

उत्तर : 'अपादो पदसन्तानो गद्यम्'।

উত্তর। 'অপাদো পদসন্তানো গদ্যম্'।

२. गद्यसाहित्यस्य प्राचीनतमं निदर्शनं कुत्र समुपलभ्यते ?

২. গদ্যসাহিত্যস্য প্রাচীনতমং নিদর্শনং কুত্র সমুপলভ্যতে ?

उत्तर : शुक्लयजुर्वेदस्य वाजसनेयिसंहितायाम्।

উত্তর। শুক্লযজুর্বেদস্য বাজসনেয়িসংহিতায়াম্।

३. गद्यस्य मुख्यतः कियन्तौ भेदौ स्तः ?

৩. গদ্যস্য মুখ্যতঃ কিয়ন্তৌ ভেদৌ স্তঃ ?

उत्तर : विभागद्वयम्–कथा आख्यायिका चेति।

উত্তর। বিভাগদ্বয়ম্-কথা আখ্যায়িকা চেতি।

४. अग्निपुराणानुसारं गद्यं कतिधा विभक्तम् ?

৪. অগ্নিপুরাণানুসারং গদ্যং কতিধা বিভক্তম্ ?

उत्तर : अग्निपुराणे गद्यस्य भेदपञ्चकं स्वीकृतम्।

উত্তর। অগ্নিপুরাণে গদ্যস্য ভেদপঞ্চকং স্বীকৃতম্।

५. अग्निपुराणानुसारं गद्यभेदानि कानि भवन्ति ?

৫. অগ্নিপুরাণানুসারং গদ্যভেদানি কানি ভবন্তি ?

उत्तर : आख्यायिका, कथा, खण्डकथा, परिकथा, कथालिका चेति।

উত্তর। আখ্যায়িকা, কথা, খণ্ডকথা, পরিকথা, কথালিকা চেতি।

६. कथाप्रकारकं गद्यकाव्यं किं भवति ?

৬. কথাপ্রকারকং গদ্যকাব্যং কিং ভবতি ?

उत्तर : कविकल्पनाश्रितं गद्यं कथाकाव्यम्।

উত্তর। কবিকল্পনাশ্রিতং গদ্যং কথাকাব্যম্।

Scanned with CamScanner

७. आख्यायिकाप्रकारकं गद्यकाव्यं किं भवति ?

৭. আখ্যায়িকাপ্রকারকং গদ্যকাব্যং কিং ভবতি ?

उत्तर : इतिहासाश्रितं गद्यकाव्यं आख्यायिका भवति।

উত্তর। ইতিহাসাশ্রিতং গদ্যকাব্যং আখ্যায়িকা ভবতি।

८. गद्यस्य सांगठनिकाः भेदाः कतिविधाः भवन्ति ?

৮. গদ্যস্য সাংগঠনিকাঃ ভেদাঃ কতিবিধাঃ ভবন্তি ?

उत्तर : चतुर्विधाः।

উত্তর। চতুর্বিধাঃ।

९. गद्यस्य सांगठनिकाः भेदाः के सन्ति ?

৯. গদ্যস্য সাংগঠনিকাঃ ভেদাঃ কে সন্তি ?

उत्तर : मुक्तकम्, चूर्णकम्, वृत्तगन्धिः, उत्कलिकाप्रायश्चेति।

উত্তর। মুক্তকম্, চূর্ণকম্, বৃত্তগন্ধিঃ, উৎকলিকাপ্রায়শ্চেতি।

१०. मुक्तकगद्यं किम् ?

১০. মুক্তকগদ্যং কিম্ ?

उत्तर : समासविहीनं गद्यं मुक्तकम्।

উত্তর। সমাসবিহীনং গদ্যং মুক্তকম্।

११. चूर्णकं किम् ?

১১. চূর্ণকং কিম্ ?

उत्तर : अल्पसमासयुक्तं गद्यं चूर्णकम्।

উত্তর। অল্পসমাসযুক্তং গদ্যং চূর্ণকম্।

१२. वृत्तगन्धिगद्यं किं भवति ?

১২. বৃত্তগন্ধিগদ্যং কিং ভবতি ?

उत्तर : वृत्तभागयुक्तं गद्यं वृत्तगन्धिः।

উত্তর। বৃত্তভাগযুক্তং গদ্যং বৃত্তগন্ধিঃ।

१३. उत्कलिकाप्रायगद्यं किम् ?

১৩. উৎকলিকাপ্রায়গদ্যং কিম্ ?

उत्तर : दीर्घसमासाढ्यं गद्यम् उत्कलिकाप्रायम्।

উত্তর। দীর্ঘসমাসাঢ্যং গদ্যম্ উৎকলিকাপ্রায়াম্।

Scanned with CamScanner

१४. महाभाष्यग्रन्थे पतञ्जलिना केषां गद्यकाव्यानां नामानि उल्लिखितानि ?

১৪. মহাভাষ্যগ্রন্থে পতঞ্জলিনা কেষাং গদ্যকাব্যানাং নামানি উল্লিখিতানি ?

उत्तर : वासवदत्ता, सुमनोत्तरा, भैमरथी च।

উত্তর। বাসবদত্তা, সুমনোত্তরা, ভৈমরথী চ।

१५. गद्यसाहित्यस्य अर्वाचीनत्वविषये अलङ्कारशास्त्रस्य अभिमतं किमस्ति ?

১৫. গদ্যসাহিত্যস্য অর্বাচীনত্ববিষয়ে অলঙ্কারশাস্ত্রস্য অভিমতং কিমস্তি ?

उत्तर : 'गद्यं कवीनां निकषं वदन्ति'।

উত্তর। 'গদ্যং কবীনাং নিকষং বদন্তি'।

१६. गद्यसाहित्यस्य 'त्रयी' इति के कवयः सन्ति ?

১৬. গদ্যসাহিত্যস্য 'ত্রয়ী' ইতি কে কবয়ঃ সন্তি ?

उत्तर : सुवन्धु-दण्डी-वाणभट्टश्च।

উত্তর। সুবন্ধু-দণ্ডী-বাণভট্টশ্চ।

१७. संस्कृतगद्यसाहित्यस्य पुरोधा कविः कः भवति ?

১৭. সংস্কৃতগদ্যসাহিত্যস্য পুরোধা কবিঃ কঃ ভবতি ?

उत्तर : महाकविः सुवन्धुः।

উত্তর। মহাকবিঃ সুবন্ধুঃ।

१८. सुवन्धुना रचितं गद्यकाव्यं किमस्ति ?

১৮. সুবন্ধুনা রচিতং গদ্যকাব্যং কিমস্তি ?

उत्तर : वासवदत्ता।

উত্তর। বাসবদত্তা।

१९. आत्मपरिचयप्रदाने सुवन्धुना किमुक्तम् ?

১৯. আত্মপরিচয়প্রদানে সুবন্ধুনা কিমুক্তম্ ?

उत्तर : 'सुवन्धुः सुजनैकवन्धुः'।

উত্তর। 'সুবন্ধুঃ সুজনৈকবন্ধুঃ'।

२०. सुवन्धुना पूर्वजकवीनां कानि गद्यकाव्यानि उल्लिखितानि ?

২০. সুবন্ধুনা পূর্বজকবীনাং কানি গদ্যকাব্যানি উল্লিখিতানি ?

उत्तर : 'वसन्तसेना', 'मदनमालिनी', 'रागलेखा' -प्रभृतीनि।

উত্তর। 'বসন্তসেনা', 'মদনমালিনী', 'রাগলেখা'-প্রভৃতীনি।

Scanned with CamScanner

२१. सुवन्धुं प्रशस्य वाणभट्टेन किमुक्तम् ?
২১. সুবন্ধুং প্রশস্য বাণভট্টেন কিমুক্তম্ ?
उत्तर : 'कवीनामगलद्दर्पो नूनं वासवदत्तया'।
উত্তর। 'কবীনামগলদ্দর্পো নূনং বাসবদত্তয়া'।
२३. वासवदत्तागद्यकाव्यस्य उत्सः कः भवति ?
২৩. বাসবদত্তাগদ্যকাব্যস্য উৎসঃ কঃ ভবতি ?
उत्तर : गुणाढ्यस्य बृहत्कथा।
উত্তর। গুণাঢ্যস্য বৃহৎকথা।
२४. सुवन्धोः सम्भाव्यकालः कोऽस्ति ?
২৪. সুবন্ধোঃ সম্ভাব্যকালঃ কোঽস্তি ?
उत्तर : ख्री. सप्तमशतकः।
উত্তর। খ্রী. সপ্তমশতকঃ।
२५. वासवदत्तागद्यकाव्यस्य नायकः कः भवति ?
২৫. বাসবদত্তাগদ্যকাব্যস্য নায়কঃ কঃ ভবতি ?
उत्तर : कन्दर्पकेतुः।
উত্তর। কন্দর্পকেতুঃ।
२६. वासबदत्तायाः नायिका का अस्ति ?
২৬. বাসবদত্তায়াঃ নায়িকা কা অস্তি ?
उत्तर : वासवदत्ता।
উত্তর। বাসবদত্তা।
२७. वासवदत्तागद्यग्रन्थे नायकसखा कोऽस्ति ?
২৭. বাসবদত্তাগদ্যগ্রন্থে নায়কসখা কোঽস্তি ?
उत्तर : मकरन्दः।
উত্তর। মকরন্দঃ।
२८. वासवदत्तागद्यग्रन्थे नायिकासखी का अस्ति ?
২৮. বাসবদত্তাগদ্যগ্রন্থে নায়িকাসখী কা অস্তি ?
उत्तर : तमालिका।
উত্তর। তমালিকা।

Scanned with CamScanner

२९. वासवदत्तायाः मुख्यरसः कः भवति?

২৯. বাসবদত্তায়াঃ মুখ্যরসঃ কঃ ভবতি?

उत्तर : शृङ्गाररसः।

উত্তর। শৃঙ্গাররসঃ।

३०. सुवन्धुः अलङ्कारशास्त्रस्य कस्मिन्मार्गे निपुणः आसीत्?

৩০. সুবন্ধুঃ অলঙ্কারশাস্ত্রস্য কস্মিন্মার্গে নিপুণঃ আসীৎ?

उत्तर : वक्रोक्तिमार्गे।

উত্তর। বক্রোক্তিমার্গে।

३१. वक्रोक्तिः का भवति?

৩১. বক্রোক্তিঃ কা ভবতি?

उत्तर : शब्दस्य तूरीयाशक्तिः तथा व्यञ्जना हि वक्रोक्तिः।

উত্তর। শব্দস্য তূরীয়াশক্তিঃ তথা ব্যঞ্জনা হি বক্রোক্তিঃ।

३२. कः आलङ्कारिकः मन्यते 'वक्रोक्तिकाव्यजीवितम्'?

৩২. কঃ আলঙ্কারিকঃ মন্যতে 'বক্রোক্তিকাব্যজীবিতম্'?

उत्तर : वक्रोक्तिजीवितकारः कुन्तकः।

উত্তর। বক্রোক্তিজীবিতকারঃ কুন্তকঃ।

३३. सुवन्धुकाव्यस्य प्रसिद्धः टीकाकारः कोऽस्ति?

৩৩. সুবন্ধুকাব্যস্য প্রসিদ্ধঃ টীকাকারঃ কোঽস্তি?

उत्तर : जगन्धरः (तत्त्वदीपनी)

উত্তর। জগন্ধরঃ (তত্ত্বদীপনী)।

३४. दण्डिनः समय कालः कः भवति?

৩৪. দণ্ডিনঃ সময় কালঃ কঃ ভবতি?

उत्तर : दशकुमारम् इति गद्यकाव्यस्य रचयिता महाकविः दण्डी ख्रीष्टिये सप्तमशतके आविर्भूतः अभवत्। ६६५ ख्रीष्टाब्दतः ७२० ख्रीष्टाव्दपर्यन्तं तस्य समयकालः भवति।

উত্তর। দশকুমারম্ ইতি গদ্যকাব্যস্য রচয়িতা মহাকবিঃ দণ্ডী খ্রীষ্টিয়ে সপ্তমশতকে আবির্ভূতঃ অভবৎ। ৬৬৫ খ্রীষ্টাব্দতঃ ৭২০ খ্রীষ্টাব্দপর্যন্তং তস্য সময়কালঃ ভবতি।

४५. दण्डिनः विरचितं गद्यकाव्यं किमस्ति?

Scanned with CamScanner

৩৫. দণ্ডিনঃ বিরচিতং গদ্যকাব্যং কিমস্তি?

उत्तर : दशकुमारचरितम्।

উত্তর। দশকুমারচরিতম্।

३६. दशकुमारचरितस्य कियन्तः विभागाः सन्ति?

৩৬. দশকুমারচরিতস্য কিয়ন্তঃ বিভাগাঃ সন্তি?

उत्तर : पूर्वपीठिका, मूलभागः उत्तरपीठिका चेति।

উত্তর। পূর্বপীঠিকা, মূলভাগঃ উত্তরপীঠিকা চেতি।

३७. पूर्वपीठिकायां कियन्तः उच्छ्वासाः सन्ति?

৩৭. পূর্বপীঠিকায়াং কিয়ন্তঃ উচ্ছ্বাসাঃ সন্তি?

उत्तर : पञ्चोच्छ्वासाः।

উত্তর। পঞ্চোচ্ছ্বাসাঃ।

३८. दशकुमारचरितस्य उत्तरपीठिकायां कियन्तः उच्छ्वासाः सन्ति?

৩৮. দশকুমারচরিতস্য উত্তরপীঠিকায়াং কিয়ন্তঃ উচ্ছ্বাসাঃ সন্তি?

उत्तर : अष्टौ उच्छ्वसाः।

উত্তর। অষ্টৌ উচ্ছ্বসাঃ।

३९. दशकुमारचरितस्य उपजीव्यः विषयः कोऽस्ति?

৩৯. দশকুমারচরিতস্য উপজীব্যঃ বিষয়ঃ কোঽস্তি?

उत्तर : मगधराजस्य राजहंसस्य राज्यपुनरुद्धारविषयः।

উত্তর। মগধরাজস্য রাজহংসস্য রাজ্যপুনরুদ্ধারবিষয়ঃ।

४०. राजहंसस्य पुत्रः कः भवति?

৪০. রাজহংসস্য পুত্রঃ কঃ ভবতি?

उत्तर : राजवाहनः।

উত্তর। রাজবাহনঃ।

४१. राजवाहनस्य कति मित्राणि आसन्?

৪১. রাজবাহনস্য কতি মিত্রাণি আসন্?

उत्तर : नवमित्राणि।

উত্তর। নবমিত্রাণি।

४२. दशकुमारचरितस्य नायकः कः भवति?

Scanned with CamScanner

৪২. দশকুমারচরিতস্য নায়কঃ কঃ ভবতি ?

उत्तर : राजवाहनः ।

উত্তর। রাজবাহনঃ।

४३. दशकुमारचरितस्य नायिका का भवति ?

৪৩. দশকুমারচরিতস্য নায়িকা কা ভবতি ?

उत्तर : अवन्तिसुन्दरी ।

উত্তর। অবন্তিসুন্দরী।

४४. दशकुमारचरितस्य मुख्यरसः कोऽस्ति ?

৪৪. দশকুমারচরিতস্য মুখ্যরসঃ কোঽস্তি ?

उत्तर : शृङ्गाररसः ।

উত্তর। শৃঙ্গাররসঃ।

४५. दशकुमारं कीदृशं गद्यकाव्यम् ?

৪৫. দশকুমারং কীদৃশং গদ্যকাব্যম্ ?

उत्तर : आख्यायिका प्रकारकम् ।

উত্তর। আখ্যায়িকা প্রকারকম্।

४६. दण्डिणः पितरौ कौ स्तः ?

৪৬. দণ্ডিণঃ পিতরৌ কৌ স্তঃ ?

उत्तर : गौरीदेवी-वीरदत्तौ ।

উত্তর। গৌরীদেবী-বীরদত্তৌ।

४७. दण्डिणः प्रपितामहः कः आसीत् ?

৪৭. দণ্ডিণঃ প্রপিতামহঃ কঃ আসীৎ ?

उत्तर : महाकविः भारविः ।

উত্তর। মহাকবিঃ ভারবিঃ।

४८. दण्डिणः जन्मस्थानं किमासीत् ?

৪৮. দণ্ডিণঃ জন্মস্থানং কিমাসীৎ ?

उत्तर : दक्षिणभारतस्य काञ्चीनगरी ।

উত্তর। দক্ষিণভারতস্য কাঞ্চীনগরী।

४९. दण्डिणः पालकपितरौ कौ स्तः ?

Scanned with CamScanner

৪৯. দণ্ডিণঃ পালকপিতরৌ কৌ স্তঃ ?

उत्तर : सरस्वती श्रुतौ इति दम्पती।

উত্তর। সরস্বতী-শ্রুতৌ ইতি দম্পতী।

५०. दण्डिणः आविर्भावकालः कः भवति ?

৫০. দণ্ডিণঃ আবির্ভাবকালঃ কঃ ভবতি ?

उत्तर : ख्री. सप्तमशतकः।

উত্তর। খ্রী. সপ্তমশতকঃ।

५१. 'त्रयो दण्डीप्रवन्धाश्च' के च ते प्रवन्धाः ?

৫১. 'ত্রয়ো দণ্ডীপ্রবন্ধাশ্চ' কে চ তে প্রবন্ধাঃ ?

उत्तर : अवन्तीसुन्दरीकथा, दशकुमारचरितम्, काव्यादर्शश्च।

উত্তর। অবন্তীসুন্দরীকথা, দশকুমারচরিতম্, কাব্যাদর্শশ্চ।

५२. बाणभट्टस्य पितरौ कौ स्त ?

৫২. বাণভট্টস্য পিতরৌ কৌ স্ত ?

उत्तर : राजदेवी-चित्रभानू।

উত্তর। রাজদেবী-চিত্রভানূ।

५३. बाणभट्टस्य गोत्रपरिचयः कः अस्ति ?

৫৩. বাণভট্টস্য গোত্রপরিচয়ঃ কঃ অস্তি ?

उत्तर : वात्स्यगोत्रीयः।

উত্তর। বাৎস্যগোত্রীয়ঃ।

५४. बाणभट्टस्य पृष्ठपोषकः कः आसीत् ?

৫৪. বাণভট্টস্য পৃষ্ঠপোষকঃ কঃ আসীৎ ?

उत्तर : महाराजः हर्षवर्धनः।

উত্তর। মহারাজঃ হর্ষবর্ধনঃ।

५५. बाणभट्टस्य साहित्यकर्म किमस्ति ?

৫৫. বাণভট্টস্য সাহিত্যকর্ম কিমস্তি ?

उत्तर : हर्षचरितम्, कादम्वरी च।

উত্তর। হর্ষচরিতম্, কাদম্বরী চ।

५६. हर्षचरितं किं प्रकारकं गद्यकाव्यंम् ?

Scanned with CamScanner

৫৬. হর্ষচরিতং কিং প্রকারকং গদ্যকাব্যম্?
उत्तर : आख्यायिकाप्रकारकम्।
উত্তর। আখ্যায়িকাপ্রকারকম্।

५७. हर्षचरितस्य विषयवस्तु किमस्ति?
৫৭. হর্ষচরিতস্য বিষয়বস্তু কিমস্তি?
उत्तर : महाराजस्य प्रभाकरवर्धनस्य पारिवारिकेतिहासः।
উত্তর। মহারাজস্য প্রভাকরবর্ধনস্য পারিবারিকেতিহাসঃ।

५८. प्रभाकरवर्धनः कः आसीत्?
৫৮. প্রভাকরবর্ধনঃ কঃ আসীৎ?
उत्तर : पुष्यभूतिवंशीयः स्थानीश्वरराजः।
উত্তর। পুষ্যভূতিবংশীয়ঃ স্থানীশ্বররাজঃ।

५९. प्रभाकरवर्धनस्य कियन्तः सन्तानाः आसन्?
৫৯. প্রভাকরবর্ধনস্য কিয়ন্তঃ সন্তানাঃ আসন্?
उत्तर : द्वौ पुत्रौ, एका कन्या च।
উত্তর। দ্বৌ পুত্রৌ, একা কন্যা চ।

६०. प्रभाकरवर्धनस्य पुत्रौ कौ तावत्?
৬০. প্রভাকরবর্ধনস্য পুত্রৌ কৌ তাবৎ?
उत्तर : राज्यवर्धनः, हर्षवर्धनश्च।
উত্তর। রাজ্যবর্ধনঃ, হর্ষবর্ধনশ্চ।

६१. प्रभाकरवर्धनस्य कन्या का आसीत्?
৬১. প্রভাকরবর্ধনস্য কন্যা কা আসীৎ?
उत्तर : राज्यश्री।
উত্তর। রাজ্যশ্রী।

६२. राज्यश्रीदेव्याः पतिः कः आसीत्?
৬২. রাজ্যশ্রীদেব্যাঃ পতিঃ কঃ আসীৎ?
उत्तर : मालवराजः ग्रहवर्मा।
উত্তর। মালবরাজঃ গ্রহবর্মা।

Scanned with CamScanner

६३. ग्रहवर्मा केन निहतः ?

৬৩. গ্রহবর্মা কেন নিহতঃ ?

उत्तर : गौड़ेश्वरेण शशाङ्केन।

উত্তর। গৌড়েশ্বরেণ শশাঙ্কেন।

६४. 'हूणहरिणकेसरी' कः आसीत् ?

৬৪. 'হূণহরিণকেসরী' কঃ আসীৎ ?

उत्तर : प्रभाकरवर्धनः।

উত্তর। প্রভাকরবর্ধনঃ।

६५. हर्षचरिते कियन्तः उच्छ्वासाः सन्ति ?

৬৫. হর্ষচরিতে কিয়ন্তঃ উচ্ছ্বাসাঃ সন্তি ?

उत्तर : अष्टौ उच्छ्वासाः।

উত্তর। অষ্টৌ উচ্ছ্বাসাঃ।

६६. 'कादम्वरी' शव्दस्य कोऽर्थः ?

৬৬. 'কাদম্বরী' শব্দস্য কোঽর্থঃ ?

उत्तर : मदिरा।

উত্তর। মদিরা।

६७. 'कादम्वरी' किं प्रकारकं गद्यकाव्यम् ?

৬৭. 'কাদম্বরী' কিং প্রকারকং গদ্যকাব্যম্ ?

उत्तर : कथाप्रकारकम्।

উত্তর। কথাপ্রকারকম্।

६८. कादम्वरीकाव्यस्य उत्सः कः भवति ?

৬৮. কাদম্বরীকাব্যস্য উৎসঃ কঃ ভবতি ?

उत्तर : कविकल्पना।

উত্তর। কবিকল্পনা।

६९. कादम्वरीकाव्यस्य मुख्यरसः कः अस्ति ?

৬৯. কাদম্বরীকাব্যস্য মুখ্যরসঃ কঃ অস্তি ?

उत्तर : विप्रलम्भशृङ्गारः।

উত্তর। বিপ্রলম্ভশৃঙ্গারঃ।

Scanned with CamScanner

৭০. कादम्बरी काव्यस्य नायकः कः भवति ?

৭১. কাদম্বরী কাব্যস্য নায়কঃ কঃ ভবতি ?

उत्तर : राजकुमारः चन्द्रापीड़ः।

উত্তর। রাজকুমারঃ চন্দ্রাপীড়ঃ।

৭২. कादम्वरी काव्यस्य नायिका का भवति ?

৭২. কাদম্বরী কাব্যস্য নায়িকা কা ভবতি ?

उत्तर : विदर्भराजकन्या कादम्वरी।

উত্তর। বিদর্ভরাজকন্যা কাদম্বরী।

৭৩. कादम्वरीकाव्यस्य वक्ता कः भवति ?

৭৩. কাদম্বরীকাব্যস্য বক্তা কঃ ভবতি ?

उत्तर : वैशम्पायणः।

উত্তর। বৈশম্পায়ণঃ।

৭৪. वस्तुतः वैशम्पायणः कः आसीत् ?

৭৪. বস্তুতঃ বৈশম্পায়ণঃ কঃ আসীৎ ?

उत्तर : अभिशप्तः पुण्डरीकः।

উত্তর। অভিশপ্তঃ পুণ্ডরীকঃ।

৭৫. चन्द्रापीड़ः परजन्मनि कोऽभवत् ?

৭৫. চন্দ্রাপীড়ঃ পরজন্মনি কোঽভবৎ ?

उत्तर : राजा शूद्रकः।

উত্তর। রাজা শূদ্রকঃ।

৭৬. कादम्वरी कथाकाव्यस्य कति विभागः ?

৭৬. কাদম্বরী কথাকাব্যস্য কতি বিভাগঃ ?

उत्तर : द्वौ विभागौ–पूर्वभागः उत्तरभागश्च।

উত্তর। দ্বৌ বিভাগৌ -পূর্বভাগঃ উত্তরভাগশ্চ।

৭৭. कादम्वरी कथाकाव्यस्य उत्तरभागस्य रचयिता कः भवति ?

৭৭. কাদম্বরী কথাকাব্যস্য উত্তরভাগস্য রচয়িতা কঃ ভবতি ?

उत्तर : बाणपुत्रः भूषणभट्टः।

উত্তর। বাণপুত্রঃ ভূষণভট্টঃ।

Scanned with CamScanner

७८. भूषणभट्टः अन्यत् केन नाम्ना परिचितः ?
৭৮. ভূষণভট্টঃ অন্যৎ কেন নাম্না পরিচিতঃ ?
उत्तर : पुलिन्दः, पुलिनः इति।
উত্তর। পুলিন্দঃ, পুলিনঃ ইতি।

७९. कादम्वरी काव्यस्य सह–नायकः कोऽस्ति ?
৭৯. কাদম্বরী কাব্যস্য সহ-নায়কঃ কোঽস্তি ?
उत्तर : पुण्डरीकः।
উত্তর। পুণ্ডরীকঃ।

८०. कादम्वरी काव्यस्य सह–नायिका का भवति ?
৮০. কাদম্বরীকাব্যস্য সহ-নায়িকা কা ভবতি ?
उत्तर : महाश्वेता।
উত্তর। মহাশ্বেতা।

८१. चन्द्रापीड़स्य पितरौ कौ भवतः।
৮১. চন্দ্রাপীড়স্য পিতরৌ কৌ ভবতঃ।
उत्तर : विलासवती –तारापीडौ।
উত্তর। বিলাসবতী -তারাপীড়ৌ।

८२. तारापीड़स्य राजधानी कुत्रासीत् ?
৮২. তারাপীড়স্য রাজধানী কুত্রাসীৎ ?
उत्तर : उज्जयिन्याम्।
উত্তর। উজ্জয়িন্যাম্।

८३. उज्जयिन्याः मन्त्री कः आसीत् ?
৮৩. উজ্জয়িন্যাঃ মন্ত্রী কঃ আসীৎ ?
उत्तर : शुकनासः।
উত্তর। শুকনাসঃ।

८४. 'तिलकमञ्जरी' काव्यस्य कविः कः भवति ?
৮৪. 'তিলকমঞ্জরী' কাব্যস্য কবিঃ কঃ ভবতি ?
उत्तर : कविः धनपालः।

Scanned with CamScanner

উত্তর। কবিঃ ধনপালঃ।

**८५. धनपालस्य पृष्ठपोषकः राजा कः आसीत्?**

৮৫. ধনপালস্য পৃষ্ঠপোষকঃ রাজা কঃ আসীৎ?

उत्तर : धारानृपतिः वाक्पतिपाजः।

উত্তর। ধারানৃপতিঃ বাক্পতিরাজঃ।

**८६. तिलकमञ्जरी गद्यकाव्यस्य विषयः कोऽस्ति?**

৮৬. তিলকমঞ্জরী গদ্যকাব্যস্য বিষয়ঃ কোঽস্তি?

उत्तर : तिलकमञ्जरी-समरकेतोः प्रेमोपाख्यानम्।

উত্তর। তিলকমঞ্জরী-সমরকেতোঃ প্রেমোপাখ্যানম্।

**८७. धर्मविश्वासे धनपालः कः भवति?**

৮৭. ধর্মবিশ্বাসে ধনপালঃ কঃ ভবতি?

उत्तर : श्वेताम्वरजैनः।

উত্তর। শ্বেতাম্বরজৈনঃ।

**८८. 'गद्यचिन्तामणिः' काव्यस्य कविः कोऽस्ति?**

৮৮. 'গদ্যচিন্তামণিঃ' কাব্যস্য কবিঃ কোঽস্তি?

उत्तर : ओडयदेवः।

উত্তর। ওডয়দেবঃ।

**८९. ओडयदेवः अन्यत् केन नाम्ना परिचितः।**

৮৯. ওডয়দেবঃ অন্যৎ কেন নাম্না পরিচিতঃ?

उत्तर : वादीभसिंहः।

উত্তর। বাদীভসিংহঃ।

**९०. गद्यचिन्तामणिकाव्यस्य विषयः कः भवति?**

৯০. গদ্যচিন্তামণিকাব্যস্য বিষয়ঃ কঃ ভবতি?

उत्तर : जैनसन्न्यासिनः जीवन्धरस्य जीवनी।

উত্তর। জৈনসন্ন্যাসিনঃ জীবন্ধরস্য জীবনী।

**९१. वामनभट्टबाणस्य गद्यकाव्यं किमस्ति?**

৯১. বামনভট্টবাণস্য গদ্যকাব্যং কিমস্তি?

Scanned with CamScanner

उत्तर : वेमभूपालचरितम्।

উত্তর। বেমভূপালচরিতম্।

९२. वेमभूपालचरितम् अन्यत् केन नाम्ना परिचितम्?

৯২. বেমভূপালচরিতম্ অন্যৎ কেন নাম্না পরিচিতম্?

उत्तर : वीरनारायणचरितम्।

উত্তর। বীরনারায়ণচরিতম্।

९३. 'उदयसुन्दरी कथा' काव्यं केन विरचितम्?

৯৩. 'উদয়সুন্দরী কথা' কাব্যং কেন বিরচিতম্?

उत्तर : कविना सोड्ढलेन।

উত্তর। কবিনা সোড্ঢলেন।

९४. 'उदयसुन्दरी कथा' काव्यस्य मुख्यविषयः कोऽस्त?

৯৪. 'উদয়সুন্দরী কথা' কাব্যস্য মুখ্যবিষয়ঃ কোঽস্তি?

उत्तर : उदयसुन्दरी-मलयवाहनयोः प्रेमकथा।

উত্তর। উদয়সুন্দরী-মলয়বাহনয়োঃ প্রেমকথা।

९५. अम्बिकादत्तव्यासः कः आसीत्?

৯৫. অম্বিকাদত্তব্যাসঃ কঃ আসীৎ?

उत्तर : भारतेन्दुमण्डलस्य सदस्यः प्रख्यातः हिन्दीकविः संस्कृतकविश्च अम्बिकादत्त व्यास।

উত্তর। ভারতেন্দুমন্ডলস্য সদস্যঃ প্রখ্যাতঃ হিন্দীকবিঃ সংস্কৃতকবিশ্চ অম্বিকাদত্ত ব্যাস।

९६. कदा कुत्र च अम्बिकादत्तस्य जन्म अभवत्?

৯৬. কদা কুত্র চ অম্বিকাদত্তস্য জন্ম অভবৎ?

उत्तर : १८५८ ईशाब्दे राजस्थानस्य जयपुरे अम्बिकादत्तस्य जन्म अभवत्।

উত্তর। ১৮৫৮ ঈশাব্দে রাজস্থানস্য জয়পুরে অম্বিকাদত্তস্য জন্ম অভবৎ।

९७. अम्बिकादत्तस्य पिता कः आसीत्? कश्च तस्य गोत्रपरिचयः?

৯৭. অম্বিকাদত্তস্য পিতা কঃ আসীৎ? কশ্চ ন তস্য গোত্রপরিচয়ঃ?

उत्तर : अम्बिकादत्तस्य पिता दुर्गादत्तः। स च पराशरगोत्रीयः।

উত্তর। অম্বিকাদত্তস্য পিতা দুর্গাদত্তঃ। স চ পরাশরগোত্রীয়ঃ।

९८. अम्बिकादत्तस्य 'व्यास' इत्युपाधिः कथं जातः?

৯৮. অম্বিকাদত্তস্য 'ব্যাস' ইত্যুপাধিঃ কথং জাতঃ?

उत्तर : वाग्मिताकुशलात् अम्बिकादत्तस्य 'व्यासः' इत्युपाधिः जातः।

Scanned with CamScanner

উত্তর। বাগ্মিতাকুশলাৎ অম্বিকাদত্তস্য 'ব্যাসঃ' ইত্যুপাধিঃ জাতঃ।

९९. अम्बिकादत्तेन रचितानां साहित्यानां संख्या का भवति ?

৯৯. অম্বিকাদত্তেন রচিতানাং সাহিত্যানাং সংখ্যা কা ভবতি?

उत्तर : नवतिसंख्यकानि।

উত্তর। নবতিসংখ্যকানি।

१००. संस्कृतभाषायाम् अम्बिकादत्तस्य मुख्यरचना का अस्ति ?

১০০. সংস্কৃতভাষায়াম্ অম্বিকাদত্তস্য মুখ্যরচনা কা অস্তি?

उत्तर : शिवराजविजयम्।

উত্তর। শিবরাজবিজয়ম্।

१०१. शिवराजविजयं कीदृशं काव्यम् ?

১০১. শিবরাজবিজয়ং কীদৃশং কাব্যম্?

उत्तर : ऐतिहासिकः उपन्यासः।

উত্তর। ঐতিহাসিকঃ উপন্যাসঃ।

१०२. शिवराजविजयस्य विषयः कोऽस्ति ?

১০২. শিবরাজবিজয়স্য বিষয়ঃ কোঽস্তি?

उत्तर : माराठाकेसरिणः शिवाजिनः चरितम्।

উত্তর। মারাঠাকেসরিণঃ শিবাজিনঃ চরিতম্।

१०३. अम्बिकादत्तस्य कस्यचिदेकस्य हिन्दीसाहित्यस्य नाम कार्यम् ?

১০৩. অম্বিকাদত্তস্য কস্যচিদেকস্য হিন্দীসাহিত্যস্য নাম কার্যম্?

उत्तर : पावस पचास।

উত্তর। পাবস পচাস।

१०४. कदा च अम्बिकादत्तस्य जीवनावसानः जातः ?

১০৪. কদা চ অম্বিকাদত্তস্য জীবনাবসানঃ জাতঃ?

उत्तर : १९०० ईशाब्दे नवेम्बरमासस्य ऊनविंशतिदिवसे।

উত্তর। ১৯০০ ঈশাব্দে নবেম্বরমাসস্য ঊনবিংশতিদিবসে।

Scanned with CamScanner